यजुवद-सामवेद-संस्कारभाष्यकर्त्रा वेदान्तसूत्रेषु वैदिकभाष्यनिर्मात्रा भगवद्गीतासु भगवद्भाष्यरचयित्रा
काशीपण्डित-सभया "पण्डितराजे"तिसारस्वतसार्वभौमेति चोपाधिविभूषितेन
स्वामिश्रीभगवदाचार्ययतिराजेन विरचितेन

ईशोपनिषत्संस्कारभाष्येण

संवलिता

ईशावास्योपनिषत्

आचार्यपरमानन्दपदद्वन्द्वमुपास्महे ।
यत्कृपालेशतोपि स्यादुद्धारो नः क्षणादपि ॥१॥
दिव्यदृष्टिर्यतः प्राप्ता सत्यमार्गानुगामिनी ।
तामहं गुरुपादानां पादुकां शिरसा वहे ॥२॥
तमोघ्नं सर्वदोषघ्नं सर्वज्ञानप्रकाशकम् ।
रजः श्रीगुरुपादानां केवलं शरणं मम ॥३॥
अरण्यं कण्टकाकीर्णं निर्भीकः प्रविशाम्यहम् ।
तत्र श्रीमद्गुरोः पादपङ्कजालम्बनं महत् ॥४॥
व्याख्यातुमुत्सहे भव्या भव्यैरुपनिषद्गवीः ।
भावैः शब्दैश्च सत्कृत्याः परमार्थप्रकाशिकाः ॥५॥
मृच्छिलाखण्डयुक्तोपि गोधूम इति कथ्यते ।
मृच्छिलाखण्डसंयोगवियुक्तो हि स भुज्यते ॥६॥
समालम्ब्य गुरूणां तत्पादद्वन्द्वं महाप्रभम् ।
ईशावास्योपनिषदो भाष्यं कुर्वे सता पथा ॥७॥
सज्जना जनयिष्यन्ति हृदयेत्र महादरम् ।
दुर्जना जनयिष्यन्ति हृदये विषमुल्बणम् ॥८॥
तेषामेव विषेण स्याद्धानिस्तेन दुरव्यया ।
पायाच्छ्रीराम एवात्र तान्सदेत्येव कामये ॥९॥

शुक्लयजुर्वेदस्यान्तिमोध्याय ईशावास्योपनिषन्नाम्ना प्रथितः । पूर्वमपि मयेयमुपनिषद्व्याख्याता । अयमेतद्व्याख्यानेपरः प्रयत्नः । न हि पूर्वव्याख्यानेन मनस्तोषमनुभवति । अयमध्यायो यजुर्वेदस्य किमर्थमुपनिषत्त्वं प्रापितो विद्वद्भिरिति विचारः परमं प्रयत्नं प्राञ्जलां च बुद्धिं महच्च साहसमपेक्षते । उपनिषद्ग्रन्थारम्भो ब्राह्मणग्रन्थान्त एवेति सर्वत्रेति नात्र भवेद्विदुषां विसंवादः । तलवकारोपनिषदित्यपरपर्याया केनोपनिषत्तलवकारब्राह्मणान्ते पठिता । तलवकारीयत्वात्तलवकारोपनिषदिति संज्ञा । सैव केनेतितृतीयान्तपदेन प्रारभ्यमाणा केनोपनिषदित्यपि संज्ञायते । कृष्णयजुर्वेदस्य कठशाखायां पठिता कठोपनिषत् । अथर्ववेदस्य शौनकशाखायां मुण्डकोपनिषत् । अथर्ववेदीयर्ग्वेदीया वा माण्डूक्योपनिषत् । अथर्ववेदस्य पैप्पलादशाखायाः प्रश्नोपनिषत् । तैत्तिरीयब्राह्मणस्य केचन प्रपाठकास्तैत्तिरीयोपनिषदितिनाम्ना प्रसिद्धाः । शतपथब्राह्मणान्ते बृहदारण्यकोपनिषत्पठिता । सामवेदस्य ताण्ड्यब्राह्मणान्ते छान्दोग्योपनिषत्पठिता । एवं प्रायेण प्रसिद्धासु दशसूपनिषत्सु ईशातिरिक्ता नव प्रायेण ब्राह्मणग्रन्थेष्वेवोपदिष्टाः ।

स्थिते चैवमीशोपनिषद उपनिषत्त्वं विचारणीयम् । शुक्लयजुर्वेदस्य ब्राह्मणत्वप्रसिद्धिर्नास्ति । एवं च तदन्त ईशोपनिषदः पाठो न भवितुमर्हति । तस्यैव वेदस्य शतपथाख्यं ब्राह्मणम् । तत्रेशोपनिषन्न पठ्यते पठ्यते च बृहदारण्यकम् । अत्रेदमपि ध्येयं यत्र शतपथेस्य ब्राह्मणस्यारम्भो भवति तत्र न लिखितं दृश्यते उपनिष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिति। केवलं बृहदारण्यकमित्येवावलोक्यते। परं काण्डान्ते उपनिषन्नाम चतुर्दशं काण्डं समाप्तमिति अच्युतग्रन्थमालाकार्यालयतः प्रकाशिते शतपथब्राह्मणे दृश्यते। एतत्काण्डारम्भेपि "अथोपनिषन्नाम चतुर्दशं काण्डम्" इति दृश्यते। मन्ये भ्रान्त्यैवेदं लिखितं भवेत्। यत्र धर्मः प्रवर्ग्यो महावीरः प्रवर्ग्योत्सादनं प्रवर्ग्यकर्तृनियम इत्येतेपि कर्मप्रसिद्धा विषया निरूपितास्तत्र कथमुपनिषत्त्वमुपनिषीदेत्? किञ्च यदि सम्पूर्णं काण्डमेतदुपनिषद्रूपं स्यात्तर्हि बृहदारण्यकस्यारम्भोपीत एव स्यात्। नास्ति तथा। मध्य एव बृहदारण्यकम्। यदि बृहदारण्यकस्योपनिषत्त्वं तर्हि धर्मप्रवर्ग्यादिभिः किमपराद्धम्। तेषामपि प्रसिद्धिरुपनिषत्त्वेनैव स्यात्। परं नैतत्सम्मत कस्याप्याचार्यस्य। अस्मिन्विषये उपनिषत्प्रस्तावनायां निपुणं विवेचयिष्यामः।

प्रस्तुतेशोपनिषद्विषये विकल्पद्वयमेव संभवति। प्रथमस्थावत् यदि चत्वारिंशोध्याय उपनिषदेव तर्हि अवशिष्टा अध्याया ब्राह्मणान्येव न तु संहिताध्यायाः। यदि ३९ अध्यायाः संहिता एव तर्हि चत्वारिंशोप्यध्यायः संहितैव। न तूपनिषत्। यदि प्रथमः पक्षः कक्षीक्रियते तर्हि शुक्लयजुर्वेदोन्वेष्टव्यः। यद्यन्तिमः पक्षस्तर्हि सर्वैरेव महाचार्यैः सह महज्जन्यं जनयितव्यम्। अस्माकं मते तु प्रसिद्धा वाजसनेयसंहितैव यजुर्वेदः। ततश्च तदन्ते न संभवेदुपनिषत्। किंचोपनिषत्त्वबोधकं यत्किञ्चनात्रावलोक्यत आचार्यैस्ततोप्यधिकं तत्त्वं तत्र बहुष्वध्यायेषु वर्तत एव। कथं तर्हि तस्यैवाध्यायस्योपनिषत्त्वमिति। वेदेषूपनिषच्छब्दोपि न दृश्यते। केवलमथर्ववेद एकस्मिन्नेव मन्त्रे उपनिपूर्वकसदधातोः प्रयोग उपलभ्यते। स चायं मन्त्र :— "भद्रमिच्छन्त ऋषयः स्वर्विदस्तपोदीक्षामुपनिषेदुरग्रे।" (अथर्व० १९। ४१। १), अत्रोपनिषेदुरित्यस्य सम्प्रापुरित्येवार्थः संगच्छते। उपनिषच्छब्दार्थस्तु ततो भिन्न एव। अयं च शब्दोर्थश्चायमस्यावश्यं वेदानां कर्मकाण्डे विनियोगेन खिन्नमनस्कानां विदुषां बुद्धिप्रतिभाप्रतिभासितः। परं कथं न तात्कालिकानां विदुषां वेदार्थमीमांसायां प्रवृत्तिः समजनीति महदाश्चर्यम्। यदि ते वेदार्थालोचने प्रवृत्तिमन्तोभविष्यंस्स्तातन्त्र्येणावश्यमेव तेषां तत्त्वज्ञानमुदैष्यत्। उपनिषत्सु यदस्ति ततोप्यधिकमधिकतरमधिकतमं त्वर्ग्वेदादिषु विद्यमानमस्ति ब्रह्मज्ञानम्। तत्त्वज्ञाननिरूपको यः पन्था उपनिषदां ततोप्यभ्यर्हित एव वेदानाम्। वेदापेक्षकाणां कृते मनसि न जायते रोषो न वा दोषोद्भेदः। समय एव बलीयान्।

वेदेषु कर्माण्येव प्रतिपादितानि न तु ज्ञानलेश इतिलोकप्रवादो भवेत्तदानीमिति मन्ये। महावीरबुद्धोदयकाले वैदिकेषु कर्मसु हिंसाव्यापारः प्रधान्येन दृश्यमानो भवेदित्यपि वेदोपेक्षायां हेतुतां भजेत। वेदमन्त्रोच्चारणपुरस्परं जीवर्हिसादर्शनेन यागादिषु विदुषां हृदये वेदावहेलना व्यजृम्भत तत एव ते वेदावलोचनायां न प्रावर्तिषन्तेति शक्यते विज्ञापयितुम्। एतद्विषये विचारणीयं सर्वमुपनिषत्प्रस्तावनायां विचारयिष्यामः। इह तु लोकप्रसिद्धयनुसरणात्ते मन्त्रा इह मयापि व्याख्यायन्ते—

ईशा वास्यमिदं सर्वं यत्किच जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ १ ॥

जगत्यां ब्रह्माण्डे यत्किच यत्किञ्चिज्जगच्चिदचिदात्मकं पदार्थजातमस्ति तत्सर्वमिदं दृश्यमदृश्यमनुमेयात्मकमपीतियावत्। ईशा परमात्मना वास्यमाच्छादनीयम्। परमेश्वरेण तदिदं सर्वं जगदाच्छन्नं व्याप्तमित्यर्थः। तेन जगत्यां व्यापकेन परमेश्वरेण त्यक्तेन दत्तेन पदार्थजातेन भुञ्जीथा आत्मानं पालय शरीररक्षणादिव्यापारं कुर्वित्यर्थः। कस्यस्विद् कस्यचिदन्यस्य धनं मा गृधो मा काङ्क्षीः। कस्यचिदन्यस्याधिकां जीवनसामग्रीमवलोक्य तत्र गर्धां नाधातव्येतिभावः। नायमुपदेशो मुमुक्षूनेवोद्दिश्येतिमन्तव्यम्। साधारण्येनैव भगवती सर्वेषां हितं कामयमाना श्रुतिः सर्वानेवोपदिशति। मुमुक्ष्वपेक्षया बुभुक्षुभ्य एवायमुपदेशो विशेषतो हितकरः। यच्च यावच्च त्वया देहश्रमेण सद्बुद्धिप्रभावेण वार्जितं तदेव च तावदेव च ते। अन्यस्य कस्यापि धनर्धिमवलोक्याधिकस्यानपेक्षितस्योपार्जने मा श्राम्यः। अपेक्षितलाभं लब्ध्वा मानपेक्षितायाधिकधनाय धियमितस्ततो धावय। एतेन भाग्यपारतन्त्र्यं निरस्तम् ॥ १ ॥

तेन त्यक्तेन भुञ्जीथा इत्युक्तम्। तत्र किमीश्वरः किञ्चिदप्यकुर्वाणाय प्रयच्छत्यथवा कर्म कुर्वाणायैवेत्याशंक्याह—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे ॥२॥

कर्माणि जीवनसामग्रीसम्पादकानि शुभान्येव नाशुभानि कुर्वन्नेवेह शतं समा वर्षाणि जीवितुमिच्छेः । दयापरवशो भगवानकृतकर्मणेपि भोजनं प्रयच्छतीति जाड्येन जातं विश्वासं प्रलयमनैषीत् । अत एवैवकारस्य सामञ्जस्यम् । भिक्षावृत्तिरपि गलहस्तिता वेदितव्यानेन । एवं त्वयि वर्तमान इति शेषः । तव श्रेयःसिद्धिः स्यादित्यप्यध्याहर्तव्यम् । इतोन्यथा नास्ति जीवनोपायान्तरं । नास्ति अवश्यमावश्यकं कर्मानुष्ठेयमितिभावः । ननु कर्मप्रवृत्तौ निपतितस्य मोक्षाधिगमनिरोधः स्यादित्याह—नरे नीतिपूर्वकं, कर्म सम्पादयितरि त्वयि कर्म न लिप्यते । दुःखदं न भवतीतिभावः । नर इत्यत्र नृ नये इतिधातोर्ऋदोरप् इत्यप्प्रत्ययः । आवश्यकं हि कर्म कुर्वाणे न कर्मजं बन्धनं भवति । कर्मोपलेपस्तु तदानीमेव स्याद्यदावश्यकतानिरपेक्षं कर्म सम्पादितं स्यात् । जीवननिर्वाहक्षमं कर्म न बन्धाय दुःखाय वा भवेत् । कर्म मोक्षप्रतिबन्धकमिति निरस्तम् । कर्माहारस्तु कर्त्तव्य एवेति श्रुत्यात्र प्रतिबोधितम् ॥ २ ॥

कर्माकुर्वतो भिक्षया जिजीविषतो दोषमाह—

असुर्या नाम ते लोका अन्धेनतमसावृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥३॥

आत्मानं निघ्नन्तीत्यात्महनः । नन्वात्मनो नित्यत्वात्कथमात्महन इत्युच्यते ? उच्यते । भिक्षाचरणेन दैन्यप्रदर्शनेनाकर्त्तव्याकरणेन या स्वत्वहानिस्तदेवात्महननमिति । न हि दैन्यप्रदर्शनेन विना भिक्षालाभः सम्भवति । एवं चोदरार्थं दैन्यप्रदर्शनमेवात्मवधः । भिक्षा सर्वथा वर्ज्या शरीरसञ्चालनार्थं कर्म च निषेवणीयमेवेत्युक्तम् । ये च नैवं कुर्वन्ति तेषां दशामाह—अन्धेन तमसावृता महादुःखान्धसन्तमससंच्छन्ना लोकाः सन्ति असुर्या नाम । असुर्या असुरेभ्यो हिता असुराणां निवासस्थानरूपाः । तानतिदुःखदाँल्लोकाँस्ते भिक्षुका अभिगच्छन्ति सातत्येन प्राप्नुवन्ति अनेन भिक्षावृत्तिर्न कर्त्तव्येति सुदृढमुक्तम् । ततश्च कर्माहरणीयमेव न तु परिहरणीयमित्यायातम् । किं च येषां मनसि दम्भस्य साम्राज्यं राजते पाषण्डप्रवृत्तयो नक्तन्दिवमथ नरीनृत्यन्ति बाह्याडम्बरैः श्रद्धाप्रतारिताः प्रजा वञ्चयितुं यथाकथञ्चित्ताभ्यो वित्तादिकमपहर्तुं क्रीडन्ति येषां च बहुविधानि विधानानि समाजभयाद्वा लोकभयाद्वान्यस्माद्वा भयाद् भगवत्स्वरूपं सत्यं गोपायित्वा यं कमपि स्वार्थं पुरस्कृत्यासत्यभाषणेनान्येषां मनोरञ्जनाय प्रवर्तन्ते हतमतयस्ते जना आत्महन उच्यन्ते । एतादृशां मन्दधियां हतभाग्यानामसुर्या नाम दशाः प्रतिपन्ना भवति । अत्र लोकशब्देन दशेत्युच्यते । जीवतामप्यसन्मार्गजुषां मानुषाणामत्यन्तासुरस्वभावानुभवनीयानां दशानां दृष्टत्वात् ॥ ३ ॥

इदानीं प्रथममन्त्रोपक्रान्तस्येश्वरस्य लोकोत्तरशक्तिमत्त्वमुपासकश्रद्धासमृद्ध्यर्थमुपदिशति—

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् । तद्धावतोन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

ईशनार्थकमीट्शब्दाभिधेयं ब्रह्म कीदृशमित्याह—अनेजत्कम्पनरहितं स्थिरगति निश्चलमित्यर्थः । अथवा अनिति पृथक्पदम् । अन्सर्वप्राणप्रदमेजत्प्रकाशमानमेकमद्वितीयं मनसोतिवेगवतोपेक्षया जवीयो वेगातिशयवदेनद्ब्रह्म देवा विद्वांसः प्राकृतानीन्द्रियाणि वा नाप्नुवन्नाध्यगच्छन् । तामसव्यापारवत्त्वादित्याशयः । पूर्वं सर्वप्रथममर्षद्गच्छाद्व्याप्नुवत्सर्वव्यापकमित्यर्थः । अर्शदितिपाठे तु अविनश्यदित्यर्थः । तद्ब्रह्म धावतो वेगातिशयेन गच्छतोन्यान्वाय्वादीनत्येत्यतिक्रम्य गच्छति । न तादृशं किमपि स्थानं विद्यते यत्र महाजवेनापि धावद्भिर्यैः कैश्चिदपि स्वाग्रे तन्नावलोकितं भवेत् । अनेन ब्रह्मणः सर्वव्यापकत्वं द्योतितम् : तिष्ठत्स्वरूपतो वा स्वभावतो वा परिवर्तनरहितं सर्वदा सर्वथा वर्तत इतिभावः । एतादृशं हि तद्ब्रह्मातएव तस्मिन्मातरिश्वा जीवोपः कर्माणि दधाति समर्पयति । कर्मफलदातृत्वस्य ब्रह्मण्येव नियत्वात्तस्मिन्नेव कर्मसमर्पणस्य न्याय्यत्वम् । मातर्यन्तरिक्षे मातृगर्भाकाशे श्वयत इतिमातरिश्वा जीवः । अनेन मन्त्रेण ब्रह्मणोस्तित्वैकत्वातिजवीयस्त्वनित्यत्वाद्या धर्माः प्रख्यापिताः ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूर्वोक्तमेवार्थमुपासकस्य मनसि द्रढयितुं मन्त्रान्तरेण पुनरुपदिशति—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

तद्ब्रह्मैजति सर्वं व्याप्नोति। एजृ व्याप्तौ। छान्दसं परस्मैपदम्। तथा च तन्नैजति न कम्पते स्वयं मर्यादां नोल्लङ्घते भिया वा कस्यापि न कम्पते। तद्दूरे दूरदेशे तदु अन्तिके समीपदेशे च विद्यते। दौर्यं सामीप्यं च लोकानुसारि। सर्वव्यापिनो ब्रह्मणो नास्ति किञ्चिद्दूरम्। तद्व्याप्यत्वात्तदङ्गत्वाच्च सर्वं समीपमेव। अथवोन्मार्गगामिनां कृते तद्दूरं धर्माचाराणां कृते च तत्समीपम्। किं च तत्सर्वस्य वस्तुजातस्यान्तर् मध्ये तिष्ठतीतिशेषः। तद् उ तदेव अस्य प्रतीयमानस्य सर्वस्याखिलस्य ब्रह्माण्डस्य ब्रह्मणो बहिर्भागेपि तिष्ठतीतिशेषः। ननु कथमणुषु तस्य विभुनो ब्रह्मणोन्तर्वर्तित्वम् कथं वा विभूनां कालादीनामन्तर्वर्तित्वं संगतं स्यात्? उच्यते। ये चाणवः पदार्था ये च विभुपरिमाणास्तत्र सर्वत्रैवापेक्षाकृतमणुत्वं विभुत्वं च। अद्भुतशक्तिनो ब्रह्मणस्तस्याणुपदार्थापेक्षयाणतमत्वमुपनिषद्येव प्रसिद्धमणुतो अणीयानित्यत्र। विभुत्वमपि तस्य लोकोत्तरमेव। न तस्य प्रतिमास्तीत्यादिना परिमाणेपि तस्याप्रतिमत्वमेव विज्ञेयम्। कालादिविभुपदार्थानां जागतिकान्यपदार्थापेक्षया विभुत्वं न तु परब्रह्मापेक्षयापि। अघटनीयघटनाघटनपटीयसो ब्रह्मणो विषय इदं संभवति नेदं संभवतोत्यादि विचारो दुःखद एव ॥५॥

पञ्चमेन मन्त्रेण ब्रह्मस्वरूपमुपदिष्टम्। सर्वं वस्तुजातं व्याप्य ब्रह्म तिष्ठतीति सर्वस्य ब्रह्मात्मकत्वमापन्नम्। सर्वं जगद् ब्रह्मात्मकमित्यनुसंदधानस्य ज्ञानिनः किंप्रयोजनमित्याह—

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥६॥

यस्तूपासको ज्ञानी वा सर्वाण्येव भूतानि भूतभौतिकानि जगत्यात्मन्येव स्वस्मिन्नेवानुपश्यति, आत्मानं स्वं च सर्वभूतेषु पश्यति ततस्तस्मादेतात्त्वज्ञानात्स न विजुगुप्सते कुत्रापि घृणाबुद्धिं न कुरुते। अत्र किमपि विचारणीयम्—विजुगुप्सानिवारणमिष्टम्। अयमुत्तमोयं मध्यमोयमधमोयमधमाधम इति विचारेणैव विजुगुप्सा कस्यापि मनसि पदं निधत्ते। विचारश्चेदृशो विजुगुप्सामावहति। विजुगुप्सा च मनोमालिन्यमानयति। मनसो मालिन्यं च सर्वपुण्यक्षयं सम्पादयति। एवं चानर्थपरम्परामूलभूता विजुगुप्सा परिहरणीयैत्युक्तं भवति। आत्मन्येव पश्यतीत्यस्यात्मत्वेन पश्यतीत्यर्थः। भेदो हि विभिन्नक्त्येव समदर्शनम्। समदर्शनाभावो निपातयत्येवाधमायां स्थितौ। अधमा स्थितिस्तु न कस्यापि लाभायोत्कर्षाय वा तत एव सा न कस्मा अपि रोचते। अत आत्मसर्वभूतयोः सामानाधिकरण्यं नास्ति। बहुदेशव्यापीनि वस्तूनि न ह्यणुपरिमाणात्मक आत्मन्यवकाशं लब्धुं शक्नुवन्ति। अत आत्मन्येवेत्यस्यात्मत्वेनेत्येवार्थः संगच्छते। किं चात्मन्यधिकरणभूते सर्वभूतानुदर्शनं विजुगुप्सां न तिरोधापयति। कस्मिंश्चिदधिकरणे स्थितानि वस्तूनि विजुगुप्सां निवारयन्तीति न कुत्रापि दृष्टचरम्। किं च यद्यात्मैवात्राधिकरणं तर्ह्यनुपश्यतेः कर्ता कः सम्भवेत्? आत्मव्यतिरिक्तस्य कस्यापि कर्तृत्वस्यासम्भवात्, बहुदोषदुष्टत्वादस्य पक्षस्यात्मन्येवेत्यस्यात्मत्वेनेत्येवार्थः सामञ्जस्यं सन्धत्ते। एवमेव सर्वभूतेष्वात्मानुसन्धानमपि न बहुफलं समर्पयति। अथा समर्पयतु नाम न तत्र मत्सरः। सर्वभूतेष्वात्मदर्शनं विजुगुप्सां शमयितुं स्यादेव समर्थम्। यथा न कोप्यनुन्मत्त आत्मने द्रुह्यति तथैव स्वाधिकरणाधेयभूतानि भवीयानि भव्यान्यभव्यानि वा भूतजातानि न कश्चिद्विजुगुप्सते। इदमुक्तं भवति—अयं ब्राह्मणोयं शूद्रोयमन्त्यजः। गौरियमयं च श्वा अयं मित्रमयं शत्रुः। अयं प्रियोप्रियश्चायम्—एवंविधैर्बहुभिर्भावैर्व्याकुलीभूतं तिष्ठति जगत्। वर्धते चैतादृग्भिर्भावैश्चेतसो मालिन्यम्। यावत्सर्वत्र समदृष्टिर्न भवेदात्मा तावत्समविषमयोर्बुद्ध्योर्निमज्जनोन्मज्जनलीलासंहारो न भवेत् तावदहङ्कारः क्रूरां दृष्टिं कुर्वीत द्वेषो जागृयाद् बुद्धिविकारो वर्धेत। ततश्चात्मशिवसंहारो नियतं स्यादेव। अतः सर्वमेव जगदात्मभूतमितिधीरेव धापयति लोकानमृतबिन्दून्। एतमेवार्थमग्रिमेणापि मन्त्रेण सन्देक्ष्यति भगवती श्रुतिरिति विश्रम्यतेत्र। विजुगुप्सत इत्यस्य स्थाने विचिकित्सत इत्यपि क्वाचित्कः पाठः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदा चात्मनि सर्वभूतभावयिता सर्वभूतेषु चात्मभावयिता न कस्मिन्नपि तत्त्वसाक्षात्कारे सन्दिग्धेत्यर्थः। न कुत्रापि घृणाघाततव्या न कस्यापि निन्दानुसन्धातव्येति सर्वत्र स्वात्मद्रष्टैव कर्तुं समर्थ इति ॥ ६ ॥

पूर्वोक्त संविधानस्य फलमाह—

योस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

यस्मिन्काले विजानतो विशिष्टज्ञानवतो जीवस्य सर्वाणि भूतान्यात्मैवाभूदात्मत्वेनैव सर्वाणि भूतानि विजानाति तत्त्ववेत्ता तदैकत्वमनुपश्यत आत्मत्वेनानुपश्यतः सर्वत्रात्मातिरिक्तयत्किञ्चिद्वस्तुनोभावान्मोहः कः शोकश्च कः। मोहशोकयोरस्तित्वमेव न भवति तदानीमितिभावः। विजानतः सर्वभूतानामात्मभवनार्थो विचार्यते; स्वाभवतः पृथक्सत्तानां भूतानामात्मभवनमित्यर्थोभिप्रेत आहोस्विदविद्यांतोसत्त्वानां भूतानामात्मभवनमित्यर्थः? उभयं न सङ्गच्छते। जडात्मकभूतानां चेतनात्मकात्मभवनं कथमपि न संगच्छते। न हि केनाप्युपायेन जडानां चेतनत्वप्रतिपत्तिं प्रतिपादयितुं कोपि वर्षशतेनापि समर्थः। अविद्यातो वा प्रतीयमानानां वस्तुतोसत्त्वानां ब्रह्मप्रतिपत्तिस्तु कथमपि न्यायपथमारोढुं न शक्नोति। एवं च सर्वत्र चिदचिदात्मकेषु वस्तुषु केवलमात्मबुद्धिमनुसन्दधानस्यैव मोहशोकविनिवृत्तिरभिधीयते। अयं मतो भिन्न इत्येव बुद्धिः सम्बन्धमनुबध्नाति। अयमहमेवेति बुद्धिर्भेदं विभिद्याभेदमनुसन्धापयन्ती सर्वविधं प्रस्तृतं प्रसरन्तं च मोहं शोकं च निवर्तयतीतिभावः। मोहनिवृत्तौ शोकनिवृत्तिः स्यादेव। इदं ममेति मोहस्वरूपम्। हन्तेदं मे विनष्टमिति शोकस्वरूपम्। मिथ्याप्रतिपत्तिलक्षणो दोष इतिवात्स्यायनमुनिर्न्यायभाष्ये (४।१।३)। मोहस्वरूपं तमोगुणप्रयोज्योन्तःकरणपरिणामविशेष इति सांख्या आहुः। इष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थना शोक इति न्यायवार्तिककाराः ॥७॥

ब्रह्मणः स्वरूपं दाढर्याय पुनरुपदिशति प्रपञ्चेन—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

स इति पुल्लिङ्गनिर्देशः परमात्मापेक्षया। तद्ब्रह्म पर्यगात्परितोगात् सर्वगं सर्वव्यापकमित्यर्थः। कीदृशं तत्? शुक्रं प्रकाशस्वरूपम्। शुच दीप्तौ। अकायमशरीरमत एवाव्रणं व्रणरहितम्। व्रणशब्दः सर्वदेहविकारसमुच्चायकः। देहाभावे सर्वदेहविकाररहितमित्यर्थः। अस्नाविरं स्नाय्वादिरहितम्। स्नायवो विद्यन्ते यस्मिंस्तत्स्नाविरम्। स्नाविरं नेत्यस्नाविरम्। शुद्धमनाघ्राताज्ञानादिदोषगन्धम्। शरीरदोषरहितं च। अपापविद्धं पापविद्धं न भवतीत्यपापविद्धम्। पापशब्दोपि दोषवाचकः। अनुकूला हि भगवती श्रुतिरेकमेवार्थं शब्दान्तरेणापि पौनःपुन्येनोपदिशतीति न पुनरुक्तिदोषोद्भावनम्। देहदोषं निषिध्य तद्गुणानाह विशेष्यमुखेन। कविर्विद्वान्सर्वज्ञ इत्यर्थः। मनीषी मननशीलः। न तत्राविवेकित्वमितिभावः। परिभूः परितो भवति विद्यत इति सर्वव्यापक इत्यर्थः। ननु पर्यगादित्यनेनैव परिभूरित्यर्थस्य गतार्थता; कथं पुनरुक्तिरेषा? उच्यते। पूर्वं समाहितं दयार्द्रहृदया जीवहितायैकमेवार्थं पुनः पुनरुपदिशति दाढर्यचर्चाय। अथवा भू प्राप्तौ। चौरादिको धातुः। परितो भावयति सर्वत्रोत्तमाधमादियोनिं कर्मानुसारेण प्रापयति जीवानिति परिभूः। अथवा दुर्जनान्परिभवतीति परिभूः। स्वयम्भूः स्वयमेव भवति नान्यः कश्चन तस्य भावयितोत्पादयिता वा। एतेन तस्य जन्मादिको जीवदोषो निरस्तः। किं च शाश्वतीभ्यः समाभ्योनन्तकालादित्यर्थः। याथातथ्यतो याथार्थ्येनार्थान् व्यदधाद्विदधातीत्यर्थः। एतद्धि वैदिकब्रह्मस्वरूपम् ॥८॥

शब्दान्तरेण प्रकारान्तरेण च पुनरपि तमेवार्थं विधत्ते—

अन्धं तमः प्रविशन्ति ये सम्भूतिमुपासते।
ततो भूय इव ते तमो य उ सम्भूत्यां रताः ॥९॥

अत्र सम्भूत्यसम्भूतिशब्दयोर्महान् विग्रहः। एवं च सम्पूर्णोमन्त्रो युद्धभूमिः अत्र लोकायतिकाः प्रस्तूय निन्द्यन्त इत्युव्वटः। महीधरोपि तमेवानुसरति। महीधरोपि मुख्यतया सायणमनुसरति महीधरमपि। "प्रणम्य लक्ष्मीं नृहरिं गणेशं विलोक्यौव्वट माधवीयम्" इतिशुक्लयजुर्वेदभाष्यारम्भे तत्प्रतिज्ञावाक्यावलोकनात्। अव्याकृताख्याविद्येति शंकराचार्याः। रङ्गरामानुजस्तु असम्भूतिशब्दस्तु समाध्यंगभूतां निषिद्धनिवृत्तिमाहेति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वयं तु अग्रिम एकादशे मन्त्रे सम्भूतिं च विनाशं चेति सम्भूतिविनाशयोः साहचर्यदर्शनात्सम्भूतिरुत्पत्तिरिति मन्यामहे। सम्भूतिरुत्पत्तिः। असम्भूतिरनुत्पत्तिः। उत्पत्त्यनुत्पत्तिविचारो जगदाश्रित्यैव न ब्रह्म न वात्मानम्। सर्वेषामास्तिकानां मते तयोर्नित्यत्वस्य स्वीकारात्। इतः पूर्वस्मिन्मन्त्रे स पर्यगादित्यत्र ब्रह्मस्वरूपमुपवर्णितमिति तु न विस्मर्तव्यम्। ततश्च ब्रह्मविषयिण्येवेयं श्रुतिः। अर्थस्त्वित्थम्। ये वेदविरोधिनो जना ब्रह्मणोसम्भूतिं विनाशमुपासते मन्यन्ते ते अन्धं तमः प्रविशन्ति। तेज्ञानिन इति भावः। ये च संम्भूत्यां ब्रह्मोत्पद्यते इति मतौ रतास्तेपि तमोन्धं तम इत्येव प्रविशन्ति। अत्र भूय इत्यप्यर्थकः। इवेत्यप्यर्थकः। उ इति चकारार्थकः। तृतीयस्मिन् पादे अन्धमित्यध्याहार्यम्। एवं च ये ब्रह्मण उत्पत्ति विनाशं च मन्यन्ते ते सर्व एवावतमसाधिकारिणः। उत्पत्तिविनाशाभ्यां ब्रह्मस्वरूपमवहीयते। अतएवानुक्रोशः ॥९॥

कुतोयमभिशाप इत्युच्यते—

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

ये धीरा विद्वांसोस्मांस्तद्ब्रह्म विचचक्षिरे व्याख्यातवन्तस्तेषामिति शुश्रुम। इति किम्? तर्कवचः। किं तत्? इत्थम्। सम्भवाद् ब्रह्मण उत्पत्तेरितिभावः। अन्यदेवाहुः। असम्भवाद्विनाशाच्चान्यदेवाहुः। ब्रह्मणः सम्भवासम्भवयोः सम्भूतिविनाशयोरन्यदेव तत्त्वं ते उपादिशन्। ततः किम्? तत्तूह्यम्। ऊहश्चैतादृशः। यदि ब्रह्मणः सम्भूतिस्तस्याः कारणमन्वेष्टव्यम्। वस्तुजातस्योत्पत्तावस्त्येव किञ्चित्कारणम्। जडतत्त्वोत्पत्तौ जीवानां कर्माणि कारणम्। कर्माण्यनुस्मृत्यैव परमात्मा जडवस्तूनि जीवानां फलभोगाय परस्मिञ्जन्मन्युत्पादयते। यदि परमात्मनोपि किञ्चिदस्त्येव कर्म तर्हि तद्वक्तव्यम्। किं च जीवकृतकर्मफलप्रदातृत्वेण परमात्मैव निश्चितः। तर्हि परमात्मकृतकर्मफलप्रदातृत्वं कुत्रावस्थितमित्यपि मृग्यमेव। यद्यस्त्येव कश्चिदन्यः परमात्मा तर्हि स वेदैरज्ञात एव। एवं च ब्रह्मणो नास्ति संभूतिः। विनाशोपि न। जातमेव विनश्यति नाजातम्। यदि ब्रह्मविनाशस्तर्हि कदा? केन च स उत्पाद्यते? जीवानां कर्मणामिव ब्रह्मणोपि कर्मणां ज्ञानेन भक्त्या वा यदि नाशः स्यात्तर्हि ब्रह्ममोक्षे को नाम जगत्कर्ता कश्च विनाशयिता कश्च फलदाता कश्च जगन्नियामक इत्यादयो बहवः प्रश्नाः अनुत्तरणीया एव सन्ति। एवं च न ब्रह्म नात्मा न सृष्टिर्न प्रलयः इत्यन्धन्तमः प्रवेशो भूयान्स्यात्। अतो ब्रह्मण उत्पत्तिविनाशौ स्वीकर्तारो महाज्ञानान्धकूपनिवासिन इति भावः ॥१०॥

अतः—

सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥११॥

सम्भूतिमुत्पत्तिं विनाशं च तदुभयमेतदुभयं यो वेद। कस्य सम्भूतिर्भवति कस्य च विनाशो भवति तदुभयं यो वेद जानाति स हेति निश्चयार्थे। निश्चितं विनाशेन कस्य विनाश इति ज्ञानेन सम्भूत्या कस्य सम्भूतिरिति ज्ञानेन च मृत्युं तीर्त्वाऽमृतमश्नुते। अत्र तत्त्वंत्रयं प्रतिपादितम्। ब्रह्म जीवः प्रकृतिरिति। जनिमृति जगत एव नात्मनो न वा परमात्मनः। मृत्योस्तरीता जीवः। अमृतं ब्रह्मेति। प्रकृतिस्वरूपविज्ञानेन तां परित्यज्य मुक्तः संसारबन्धनाज्जीवो ब्रह्माश्नुत इति ब्रह्मानुभवतीति ॥११॥

अन्धं तमः प्रविशन्ति येविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥१२॥

भूय इव उ एष शब्दसमूहः पूर्वं व्याख्यातः। अत्र विद्याविद्येतिशब्दयोर्लोकप्रसिद्ध एवार्थः। स च ज्ञानं कर्म च। ज्ञानशब्देन न ब्रह्मज्ञानमेव ग्राह्यम्। कर्मशब्देन न यज्ञादिकमेव ग्राह्यम्। जीवनोपयोगि सर्वविधज्ञानं विद्याशब्दार्थः। सर्वमेव सत्कर्माविद्याशब्दार्थः। एवं च ये जना अविद्यां कर्मैवोपासते कर्मकुर्वन्त एव जीवनान्तं गच्छन्ति ते अन्धं तमो महद् दुःखं प्रविशन्ति प्राप्नुवन्ति। ये च विद्यायामेव रता बहुविधज्ञानार्जने प्रवृत्ता न ततो निवर्तन्ते तेप्यन्धं तम एव प्रविशन्ति। वयसस्तृतीयस्मिन्भागे वनी वा भवेद्यतिर्वा भवेत् इत्यार्याणां प्रणालिः। तां प्रणालिमेवानुस्मृत्येहोक्तमाजीवनं न केवलं कर्मैव कर्त्तव्यं किन्नु तत्त्यागपुरस्सरं वानप्रस्थेन यतिना वा भवितव्यम्। कर्मकरणेन कर्माकर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णेन वा प्रत्यवायो भवतीति येषां मतं ते भ्रान्ताः। कर्मकरणकालं यावत्कर्म कर्त्तव्यमेव ततः परं वानप्रस्थाश्रमः संन्यासाश्रमो वा प्रवेष्टव्य इत्येवाशयः। कर्मणां फलं पितृलोको विद्यायाः फलं देवलोक इति मीमांसाद्य न विश्वसनीयतां प्राप्नोति। नास्ति पितृलोको न वा देवलोकः, यत्किमप्यस्त्यत्रैव जगत्यामेव न बहिस्तस्याः। पुण्यफलं पापफलमपीहैव भोक्तव्यं नान्यत्र ॥१२॥

अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१३॥

अत्रोत्तरार्धं दशममन्त्रव्याख्याने व्याख्यातं वेदितव्यम्। पूर्वार्धं व्याख्यायते—विद्याया अन्यदेव फलमाहुर्विद्वांसोन्यदेवाविद्यायाः। केवलकर्मोपासनया त्रयाणामेव गुणानां सत्त्वरजस्तमसां प्रवृत्तिर्दुर्निवारा। ततश्च पातित्यमपि संभवेत्। केवलाकर्मोपासनया शरीरनिर्वाहो न स्यात्। केवलं ज्ञानोपार्जने स्थितस्य संसारयात्रा दूषिता भवेदिति। एवं च ज्ञानकर्मोभयोपासनया सर्वभयनिवृत्तिर्भवति। ततः कर्मभिः सहैव सद्धर्मप्रवर्तकज्ञानमप्यर्जनीयमेव। नात्रापि ज्ञानशब्देन केवलं ब्रह्मज्ञानं ग्रहीतव्यम्। ब्रह्मज्ञानस्य प्रयोजनं धर्ममार्गे प्रवृत्तिरेव न ततो निवृत्तिरपि। तस्या असम्भवात्। न हि कर्ममात्रं बन्धनाय प्रभवति। दुष्कर्मण एव सा कथा। सत्कर्म तु कर्त्तव्यमेवाजीवनम्। तस्य नियतत्वात्। न हि कर्म परित्यज्य क्षणमपि कोपि जीवितुं शक्नुयात्। अतो न केनापि निष्कर्मणा भवितव्यम्। जीवननिर्वाहोपायं कुर्वन्नेव परोपकारादिधर्माचरणाख्याविद्योपार्जनीयेत्येवाशयः ॥१३॥

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥१४॥

एकादशी श्रुतिरिवेयमपि व्याख्येया। नात्र बहुतरं वक्तव्यमवशिष्यते। ज्ञानसम्पत्तिः कर्मसम्पत्तिरुभे एवार्जनीये। तत्त्वमस्यहं ब्रह्मास्मीत्यादीनां महावाक्यत्वेन प्रसिद्धानामुपनिषच्छ्रुतीनां नात्रावकाशः। अत्र त्वविद्यया कर्मोपासनया मृत्युतरणं सर्वदुःखमहासागरनिस्तरणं भवति विद्यया च संस्कारसमृद्धिर्भवति। न ह्यत्र केवलमग्निहोत्रादिकमेव कर्म ग्रहीतव्यम्। तत्तु गौणम्। यद्युदरे क्षुदनलः प्रज्वलितस्तिष्ठेद्यज्ञकुण्डानलोवश्यं भस्मावशेषस्तिष्ठेत्। अतो लौकिकसर्वदुःखसन्तरणोपायोविद्याकर्मेत्येव। धर्माय परलोकाय वा विद्याप्राप्त्या सत्संकारः सम्पादयितव्यः। विद्यया सर्वदुःखविनिवृत्तिः सार्वदिको भवेदिति परमार्थः ॥१४॥

वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।
ओ३म् क्रतो स्मर क्लिबे स्मर कृतं स्मर ॥१५॥

अथ स्वोपकारपरोपकारकरणसमर्थबहुविधकर्मानुष्ठानान्तरं हृदयकम्पनसमर्थमन्तिमं वक्तव्यं निर्दिशति-इदं शरीरं भस्मान्तं भस्म एव अन्तो यस्य तथाभूतम्। कृतेपि प्रयत्ने न शरीरमिदं चिरस्थायि। कीदृशं शरीरम्? वायुः पवनः। अनिलं नेला नेडा यस्मिन्सोनिलः। अनल इत्यर्थः। अमृतं जलम्। वायुरूपम् अनलरूपं जलरूपमित्यर्थः। तदात्मकत्वात्तत्त्वेन निर्देशः। पृथिवीतत्त्वमपि संग्राह्यमेव। शरीरे तस्यैव प्राधान्यात्। पृथिवीतत्त्वस्य प्रसिद्धत्वात्प्रत्यक्षत्वाच्च नोक्तिः। अथवेदंशब्देन पृथिव्या एव निर्देशः। स्पष्टतो देहे पृथिवीप्राधान्यस्य दर्शनादिदमा निर्देशः। यस्मिन् शरीरे महती ममता महानहङ्कारस्तद्भस्मान्तमेव भवति। तस्यान्तो नियत एव। ततो हे क्रतो कर्मकर्तः शरीरमोहं विहाय ओम् स्मर। सर्वदा रक्षतीत्योम्। सुखे दुःखे प्राङ्गणे वने जले स्थले विहायस्यनेहस्यहनि सर्वदा सर्वत्र यो रक्षति स ओम् परमात्मा। तं स्मर। शरीरान्तकालोयमुपस्थित इति विज्ञाय जगज्जालजम्बालमलं परिहाय परमात्मानमेव स्मर। कल्पते समर्थो भवति सर्वकरण इति क्लिप्। परमात्मा। तमेव स्मर। ओमित्यनेन रक्षणसमर्थं इत्युक्तम्। क्लिबित्यनेन सर्वसामर्थ्यमुक्तम्। क्लिबे इत्यत्र पदान्तत्वं छन्दस्युभयथेति-पाणिनिस्मृतेः। अथवा कल्प्यत इति क्लिप्। पुनर्जन्म। तदर्थं स्मर। भावि ते पुनर्जन्म। सुकृतदुष्कृतयोः फलभोगायैव पुनर्जन्म। तदपि स्मर। न तथा किमपि कदाप्याचरणीयं येन भविष्यति दुःखं स्यादित्युपदेशार्थं त्रिः स्मरोक्तिः। शरीरे मोहमपहायोमेवान्तकाले स्मरेत्युपदेशः। किं च कृतं पापं वा पुण्यं वा सुकृतं वा दुष्कृतं वा यत्किञ्चित्त्वया जन्मनीह कृतं तत्सर्वदा स्मरेति। उपनिषद्ग्रन्थेषु ओं क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मरेतिपाठः ॥१५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥१६॥

पुनश्चोपदिशति सार्वदिकं कृत्यम्। प्रत्यहं परमात्मस्मरणपूर्वकमित्यभ्यर्थनापि करणीयेति। प्रकारमाह। हे अग्ने प्रकाशस्वरूप, अस्माञ्जीवान् सुपथा सन्मार्गेण नय। राये धनाय। ततो धनप्राप्तिः स्यात्। नात्र सामान्यं लोकलभ्यं धनमर्थ्यते। किञ्च परोपकारादिरूपं धनमर्थ्यते। हे देव त्वं विश्वानि सर्वाणि वयुनानि प्रज्ञानानि विद्वाञ्जानानः। त्वं सर्वज्ञोसीत्यस्माँस्तथा नय यथा न दुःखभाजो भवामेति। किंचास्मत् जुहुराणं कुटिलं दुस्तरमेनः पापं युयोधि पृथक्कुरु। मा भूदस्माकं दुराचारेण संसर्गः सम्पर्को वा। एतदर्थं भूयिष्ठां बहुलां ते तव पुरस्तान्नम उक्तिं नमस्कारवचनं विधेमोच्चारयामः ॥१६॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
योसावादित्ये पुरुषः सोसावहम् ॥१७॥
ओ३म् खं ब्रह्म ॥

परमेश्वरप्रार्थनापरिपूतो भवन्नुपासकः स्वरूपं संस्मृत्याह—हिरण्मयेन चाकचिक्ययुक्तेन मनोहरेण सांसारिकेण पात्रेणाज्ञानाद्बाह्याडम्बरेणेत्यर्थः। सत्यस्य मम स्वरूपस्य मुखमपिहितमाच्छादितमासीत्। तेनाज्ञानात्कर्त्तव्ये कर्मणीवाकर्त्तव्येपि कर्मणि निमग्न आसम्। परमगुरोरनुकम्पया प्राप्तज्ञानप्रकाशेनाद्य मयावगतं योसावादित्ये सूर्यमण्डले यावदादित्यप्रकाशस्तावज्जगत्प्रदेश इत्यर्थः। पुरुषो विद्यते परमात्मरूपः सोसावहमेवेति। सोसावहमित्यल्पपरिमाणस्य जीवस्योक्तिः परिहासायैव स्यात्ततस्तदीयत्वात्तदुक्तिर्विज्ञेया। राजपुरुषो राजेतिवत्। अत्रेदमवधेयम्। अस्मिन्मन्त्रे पूर्वार्धंस्तु सर्वेष्वेवोपनिषद्ग्रन्थेषु समानः। परमुत्तरार्धे "तत्त्वं पूषन्नपावृणु" "सत्यधर्माय दृष्टये" इतिपाठः। एतस्यायमर्थः—हे पूषन् सर्वपोषक, सत्यधर्माय सत्यधर्मस्येतिभावः। षष्ठ्यर्थे चतुर्थी। सत्यश्चासौ धर्मश्च तस्य दृष्टये दर्शनाय प्राप्तये तन्मुखं यद्धिरण्मयपात्रेणाच्छादितम् त्वमपावृण्वनावृतं कुर्विति ॥१७॥

उपनिषद्ग्रन्थेष्वतः परमयमपि मन्त्रः पठितो दृश्यते—

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह। तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योसावसौ पुरुषः सोहमस्मि ॥१८॥

एतस्यार्थः। हे पूषन्सर्वपोषणकर्तः, हे यम सर्वेषां नियमयितः हे सूर्य सर्वत्र सरणशील, प्रजापत्य प्रजापते, व्यूह ममाज्ञानान्धकारम्। रश्मीञ्ज्ञानरश्मीन्दूरं गतान् समूहैकीकुरु। किमर्थम्? यत्ते तव कल्याणतमं कल्याणकृत्तमं रूपं तेजस्तेजस्वि तत्पश्यामि साक्षात्करवाणि। अत्र यत्ते तत्ते उभयत्र ते इत्यस्य पाठोनर्थक एव। ननु तद्रूपदर्शनेन को लाभस्तवेत्याह—योसौ असौ पुरुषश्चैत्रमैत्रादिकस्तद्दर्शनेन कार्तार्थ्यं गतवान् स पुरुषः स एव पुरुषोहमस्मि अहमप्यस्मि। एवं च यथा त्वद्दर्शनेन तत्तत्पुरुषाणामुद्धारस्तथा ममापि स्यादित्यभ्यर्थनहृदयम् ॥१८॥

उपनिषत्सु "पूषन्नेकर्षे" इत्यादिमन्त्रोन्तिमः। यजुर्वेदे तु षोडश उपान्त्यः।

उपनिषद्ग्रन्थे "अन्धं तमः प्रविशन्ति ये अविद्यामुपासते···" इति मन्त्रो नवमः "अन्यदेवाहुरविद्यये"ति दशमो "विद्यां चाविद्यां चे"त्येकादशः। यजुर्वेदे तु क्रमेणैतेषां संख्या १२, १३, १४ विज्ञेया। एवमन्धंतमः प्रविशन्ति ये सम्भूतिमुपासते इत्याद्या क्रमशस्त्रयो मन्त्रा उपनिषद्ग्रन्थेषु १२, १३, १४ संख्याकाः। यजुर्वेदे तु ९, १०, ११ संख्याकाः। एवं च पाठभेदेनोपनिषद्ग्रन्थेष्वत्राष्टादश मन्त्राः। वेदे तु सप्तदश।

इदमप्यवधेयम्—यजुर्वेदे हिरण्मयेनेत्यन्तिमे मन्त्रे सप्तदशेतिगणनासंख्याप्रदानानन्तरम् "ओ ३ म् खं ब्रह्म"ति पाठः। स च न मन्त्राङ्गरूपः। मन्ये वेदसमाप्तिसूचकः स इति। परं सर्वानुक्रमसूत्रे दृश्यते "·····त्रिभिर्यजुभिरन्ते यज्ञान्योगी स्मारयत्यग्ने नयान्तनमस्कारोक्तिर्हिरण्मयेनादित्योपासनमो ३ मिति नामनिर्देशो ब्रह्मणः खं ब्रह्मेत्याकाशरूपमन्ते ब्रह्म ध्यायेत्॥" इति। एतेनावगम्यते ओ३म् खं ब्रह्मेत्यस्य वेदानङ्गत्वेपि वेदसमाप्तौ पाठ-प्रणाली चिरेण प्रवृत्तासीत्। उपनिषद्ग्रन्थेषु समाप्तौ नायं पाठो दृश्यते। याज्ञिकानां सम्प्रदाये कर्मान्ते स्यादेवास्य भागस्य पाठस्तदन्ते च ओ३म् खं ब्रह्मेत्यस्यापि पाठः॥

इति शुक्लयजुर्वेद (ईशावास्य) संस्कारभाष्यम् समाप्तम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri